# Main language SANSKRIT 23S
## paper -1

**Time : 3.15 hours** **X class** **Max. Marks : 100**

सूचनाः – 1. प्रश्नानां समाधानानि समाधानपत्रे एव लेखनीयानि ।

2. प्रश्नपत्रस्य पठनार्थं 15 निमेषाः देयाः ।

3. भाषांशाः इति विभागीय प्रश्नानां समाधानानि समाधानपत्रे एकत्रैव लेखनीयानि । ।

I. भाषांशाः 20M

अ. रेखाङ्कितपदस्य समुचितं समानार्थकपदं लिखन्तु । $2 \times 1 = 2$

1. कंसस्य <u>वैरी</u> कृष्णः ।

2. सुरेशः नरेषस्य वयसा <u>समानः</u> बभूव ।

आ. रेखाङ्कितपदस्य समुचितं विरुद्धार्थकपदं लिखन्तु । $2 \times 1 = 2$

3. मातादर्शनेन शिशुः <u>सन्तुष्टः</u> ।

4. <u>धीमान्</u> विवेकितया कार्यं करोति ।

इ. निर्देशानुसारं लिखन्तु । $8 \times 1 = 8$

5. " <u>गवा</u> " इत्यस्य इतरवचने लिखन्तु ।

6. " <u>वध्वै</u> " इति पदस्य विभक्तिं लिखन्तु ।

7. " <u>मेलिष्यति</u> " इत्यस्य इतरवचने लिखन्तु ।

8. " <u>गणयामि</u> " इति क्रियापदस्य भूतकाले रूपं लिखन्तु ।

9. सज्जनः <u>यच्च</u> मनसि चिन्त्यते तदेव वदति , आचरति । ( रेखाङ्कितपदं विघटयत )

10. यदि सुहृदस्ति <u>दिव्यौषधैः</u> किं प्रयोजनम् । ( रेखाङ्कितपदं सन्धत्त )

11. कौशिक ! <u>अतन्द्रितः</u> मातापितृपूजनं करोतु । ( रेखाङ्कितपदस्य विग्रहवाक्यं लिखन्तु )

12. <u>सुखार्थी</u> चेत् त्यजेत् विद्याम् । ( रेखाङ्कितपदस्य समासनाम लिखन्तु )

13. लक्ष्यलक्षणपूर्वकं <u>मन्दाक्रान्तावृत्तं</u> लिखन्तु । $1 \times 4 = 4$

14. लक्ष्यलक्षणपूर्वकं <u>उल्लेखालङ्कारं</u> लिखन्तु । $1 \times 4 = 4$

II. भावावगमनम् – प्रतिस्पन्दनम् ।

15. अधः दत्तं श्लोकं पठित्वा प्रश्नानां समाधानानि लिखन्तु । $1 \times 4 = 4$

उपास्व कौन्तेय सहानुजस्त्वं
तस्याश्रमं पुण्यतमं प्रविश्य
अष्टावक्रं यस्य दौहित्रमाहुः
योऽसौ बन्दिं जनकस्यास्य यज्ञे ।।

i. श्लोके कौन्तेयः नाम कः ?

ii. आश्रमं कीदृशम् ?

iii. अष्टावक्रः कस्य दौहित्रः ?

iv. यज्ञं कस्य यज्ञम् ?

16. श्लोकं पूरयित्वा भावं लिखन्तु । $1 \times 4 = 4$

सहसा विदधीत --------- स्वयमेव सम्पदः ।।

अथवा

यो ध्रुवाणि ---------- नष्टमेव हि ।।

17. श्लोकं पठित्वा श्लोकस्यास्य प्रतिपदार्थं लिखन्तु । $1 \times 8 = 8$

मार्गं तावच्छृणु कथयत स्वप्रयाणानुरूपं
सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्
खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र
क्षीणः क्षीणः परिलघुपयः स्रोतसां चोपभुज्य ।।

अथवा

द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदम्
पराभवोऽप्युत्सव एव मानिनाम् ।।

अधः दत्तानां प्रश्नानां समाधानानि 1 – 2 वाक्येषु लिखन्तु ।  $7 \times 2 = 14$

18. परिशुद्धाबुद्धिः किं करोति ?

19. यक्षः कीदृशं मेघं ददर्श ?

20. कौशिकः बलाकां किमर्थं दग्धामकरोत्

21. युधिष्ठिरः राज्यं कथं परित्यक्तवान् ?

22. नारदस्य सकाशात् स्वपतिं श्रीकृष्णंप्राप्तुं रुक्मिणी किं कृतवती ?

23. अभ्यासेन के न लभ्यन्ते ?

24. उद्दालकः शिष्यसेवया सन्तुष्टः सन् किं कृतवान् ?

III. भावव्यक्तीकरणं – सर्जनात्मकता

अ. 25. " ध्येयपथिकसाधक " इति पाठस्य कविमुद्दिश्य लिखन्तु ।  $1 \times 2 = 2$

आ. अधः दत्तानां प्रश्नानां समाधानानि 4 – 5 वाक्येषु लिखन्तु ।  $4 \times 4 = 16$

26. ध्येयपथिकसाधकः कार्यपथे कथं साधयति ?

27. कोपो पापस्य कारणं किमर्थम् ?

28. मानिनां पराभवः कथं उत्सवः भवति ? किमर्थं द्रौपदी एवमुक्तवती ?

29. सत्यभामा घटे बहूनि आभरणानि स्थापितवती । तथापि श्रीकृष्णस्य घटः उपरि नागतः किमर्थम् ?

**इ. अधः दत्तानां प्रश्नानां समाधानानि 10 -12 वाक्येषु लिखन्तु ।** $2 \times 8 = 16$

30. ध्येयपथिकसाधकः कार्यपथे कथं साधयति ?

अथवा

चाणक्यीतिश्लेकाः समाजं कथम् उपकुर्वन्तीति लिखन्तु ।

31. तृष्णां छिन्दि इति श्लोकेन सज्जानानां चेष्टितं ज्ञातम् । अद्यतनकाले जनानां चेष्टितं कथमस्तीति स्वीयवाक्यैः लिखन्तु

अथवा

भगवतः विषये कीदृशी भावना भवेत् ? कीदृशी भावना न भवेत् ?

**ई. अधः दत्तेभ्यः प्रश्नेभ्यः द्वयोः समाधानानि सर्जनात्मकतया लिखन्तु ।** $2 \times 8 = 16$

32. बालस्य अष्टावक्रस्य वैशिष्ट्यम् स्वीयवाक्यैः कथा कथारूपेण लिखन्तु

33. चाणक्यनीतिश्लेकानां महत्वं विवृण्वन्तःभवन्मित्राय पत्रं लिखन्तु ।

34. **संस्कृभाषायां अनुवदन्तु ।**

పూర్వం శ్రవణకుమారుడనే పేరు కల బాలుడు తల్లితండ్రులను మిక్కిలి భక్తితో ప్రేమగాసేవించేవాడు. అతను గుడ్డివారైన తల్లిదండ్రులను ప్రొద్దునే లేచి నమస్కారం చేసి వివిధసేవలు చేసేవాడు. భిక్షాటనం ద్వారా వారిని రక్షిస్తూ తాను చదువుకుంటూ ఉండేవాడు. విద్యాభ్యాసం పూర్తి అయిన తరువాత సంపాదనకొరకు వేరేనగరానికి వెళ్తున్న సమయంలో తల్లిదండ్రులను కావడిలో కూర్చోబెట్టి మోస్తూతీసుకెళ్ళేవాడు.